শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৰিতার্কিককেসরী।
ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৰিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৯০

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৯০

*আগমাদীনাং পরমতাতপৰ্যনিরূপণম্*

বৃকভৃগুমুনিমোহিন্যম্বরীষাদিবৃত্তে-
    ষ্বযি তৱ হি মহত্ত্বং সৰ্ৱশৰ্ৱাদিজৈত্ৰম্।
স্থিতমিহ পরমাত্মন্ নিষ্কলাৰ্ৱাগভিন্নং
    কিমপি যদৱভাতং তদ্ধি রূপং তৱৈৱ॥ ১ ॥

মূৰ্তিত্ৰযেশ্বরসদাশিৱপঞ্চকং যত
    প্ৰাহুঃ পরাত্মৱপুরেৱ সদাশিৱোস্মিন্।
তত্ৰেশ্বরস্তু স ৱিকুণ্ঠপদস্তৱমেৱ
    ত্ৰিত্বং পুনৰ্ভজসি সত্যপদে ত্ৰিভাগে॥ ২ ॥

তত্ৰাপি সাত্ত্বিকতনুং তৱ ৱিষ্ণুমাহু-
    ৰ্ধাতা তু সত্ত্বৱিরলো রজসৈৱ পূৰ্ণঃ।
সত্ত্বোতকটত্বমপি চাস্তি তমোৱিকার-
    চেষ্টাদিকং চ তৱ শঙ্করনাম্নি মূৰ্তৌ॥ ৩ ॥

তং চ ত্ৰিমূৰ্ত্যতিগতং পরপূরুষং ত্বাং
    শৰ্ৱাত্মনাপি খলু সৰ্ৱমযত্বহেতোঃ।
শংসন্ত্যুপাসনৱিধৌ তদপি স্বতস্তু
    ত্বদ্রূপমিত্যতিদৃঢং বহু নঃ প্ৰমাণম্॥ ৪ ॥

শ্ৰীশঙ্করোপি ভগৱান্ সকলেষু তাৱ-
    ত্ত্বামেৱ মানযতি যো ন হি পক্ষপাতী।
ত্বন্নিষ্ঠমেৱ স হি নামসহস্ৰকাদি
    ৱ্যাখ্যত্ ভৱতস্তুতিপরশ্চ গতিং গতোন্তে॥ ৫ ॥

মূৰ্তিত্ৰয়াতিগমুৱাচ চ মন্ত্ৰশাস্ত্ৰ-
স্যাদৌ কলায়সুষমং সকলেশ্বৰং ত্বাম্।
ধ্যানং চ নিষ্কলমসৌ প্ৰণৱে খলূক্ত্বা
ত্বামেৱ তত্ৰ সকলং নিজগাদ নান্যম্॥ ৬ ॥

সমস্তসাৰে চ পুৰাণসঙ্গ্ৰহে
ৱিসংশয়ং ত্বন্মহিমৈৱ ৱৰ্ণ্যতে।
ত্ৰিমূৰ্তিযুক্সত্যপদত্ৰিভাগতঃ
পৰং পদং তে কথিতং ন শূলিনঃ॥ ৭ ॥

যত্ ব্ৰাহ্মকল্প ইহ ভাগৱতদ্বিতীয়-
স্কন্ধোদিতং ৱপুৰনাৱৃতমীশ ধাত্ৰে।
তস্যৈৱ নাম হৰিশৰ্ৱমুখং জগাদ
শ্ৰীমাধৱঃ শিৱপৰোপি পুৰাণসাৰে॥ ৮ ॥

যে স্বপ্ৰকৃত্যনুগুণা গিৰিশং ভজন্তে
তেষাং ফলং হি দৃঢয়ৈৱ তদীয়ভক্ত্যা।
ৱ্যাসো হি তেন কৃতৱানধিকাৰিহেতোঃ
স্কান্দাদিকেষু তৱ হানিৱচোৰ্থৱাদৈঃ॥ ৯ ॥

ভূতাৰ্থকীৰ্তিৰনুৱাদৱিৰুদ্ধৱাদৌ
ত্ৰেধাৰ্থৱাদগতয়ঃ খলু ৰোচনাৰ্থাঃ।
স্কান্দাদিকেষু বহৱোত্ৰ ৱিৰুদ্ধৱাদা-
স্তৱত্তামসত্বপৰিভূত্যুপশিক্ষণাদ্যাঃ॥ ১০ ॥

যত্ কিঞ্চিদপ্যৱিদুষাপি ৱিভো ময়োক্তং
তন্মন্ত্ৰশাস্ত্ৰৱচনাদ্যভিদৃষ্টমেৱ।
ৱ্যাসোক্তিসাৰময়ভাগৱতোপগীত
ক্লেশান্ ৱিধূয় কুৰু ভক্তিভৰং পৰাত্মন্॥ ১১ ॥

**********



www.prapatti.com